शुभाः। कर्णिकां पीतवर्णेन केसराग्रं रक्तेन च। शुक्लवर्णानि पत्राणि तत्सन्धीन् श्यामलेन च। रजसा रञ्जयेन्मन्त्री यद्वा पीतैव कर्णिका। केसराः पीतरक्ताः स्युः रक्तवर्णानि दलान्यपि। सन्धयः कृष्णवर्णाः स्युः सितेनाप्यसितेन वा। रञ्जयेत् पीठभागांश्च पादाः स्युररुणप्रभाः। गात्राणि तस्य शुक्लानि वीथीषु चतसृष्वपि। आलिखेत् कल्पलतिकादलपुष्पफलान्विताः। वर्णैर्नानाविधैश्चित्राः सर्वदृष्टिमनोहराः। द्वाराणि श्वेतवर्णानि शोभा रक्ताः समीरिताः। उपशोभाः पीतवर्णाः कोणान्यसितभानि च। तिस्रो रेखा बहिः कार्य्याः सितरक्तासिताः क्रमात्। मण्डलं सर्वतोभद्रमेतत् साधारणं स्मृतम्"। अपरञ्च "चतुरस्रां भुवं भित्त्वा दिग्भ्यो द्वादशधा सुधीः। पातयेत् तत्र सूत्राणि कोष्ठानां दृश्यते शतम्। चतुश्चत्वारिंशदाढ्यं पश्चात् षट्त्रिंशताम्बुजम्। कोष्ठैः प्रकल्पयेत् पीठं पङ्क्त्या नैवात्र वीथिकाः। द्वारशोभे यथा पूर्वमुपशोभा न दृश्यते। अवशिष्टैः पदैः कुर्य्यात् षड्भिः कोष्ठानि तन्त्रवित्। विदध्यात् पूर्ववत् शेषमेवं वा मण्डलं स्मृतम्"। "चतुरस्रे चतुःषष्टिं पदान्यारचयेत् सुधीः। पदैश्चतुर्भिः पद्मं स्यात् मध्ये तत् पूरिताः पुनः। वीथीश्चतस्रः कुर्वीत मण्डलान्तरशालिकाः। दिग्गतेषु चतुष्केषु पङ्कजानि समालिखेत्। विदिग्गतचतुष्काणि भित्त्वा षोडशधा सुधीः। मार्जयेत् स्वस्तिकाकारं श्वेतपीतारुणासितैः"। मार्जनमाह राघवभट्टधृतम् "विदिग्गतचतुष्कोणान् भित्त्वा षोडशधा सुधीः। वह्न्यादिकोष्ठत्रितये मध्योर्ध्वमपि मार्जयेत्। रजोभिः पूरयेत्तानि स्वस्तिकानि शिवादितः। प्राक् प्रोक्तेनैव मार्गेण शेषमन्यत् समापयेत्। नवनाभमिदं प्रोक्तं मण्डलं सर्वसिद्धिदम्। पद्माब्जमण्डलं प्रोक्तमेतत् स्वस्तिकवर्जितम्। दीक्षायां देवपूजायां मण्डलानां चतुष्टयम्। सर्वतन्त्रानुसारेण प्रोक्तं सर्वसमृद्धिदम्"।

**सर्वतोमुख** न० सर्वतो मुखमस्य। १जले अमरः २आकाशे मेदि० ३शिवे ४ब्रह्मणि ५परमेश्वरे ६आत्मनि च पु० मेदि०। ७ब्राह्मणे शब्दच० ८स्वर्गे ९अग्नौ शब्दमा०। "सर्वतःपाणिपादान्तः सर्वतोऽक्षिशिरोमुखः। विश्वरूपो महानग्निः प्रणीतः सर्वकर्मसु" ति०त० उक्तेः वह्नेस्तथात्वम्। [वित्यर्थे।

**सर्वत्र** अव्य० सर्व-त्रल्। सर्वस्मिन् काले देशे सर्वास्यां दिशि

**सर्वत्रग** पु० सर्वत्र गच्छति गम-ड। १वायौ शब्दच० २सर्वत्रगामिनि त्रि०। [र्वत्र गन्तरि त्रि० स्त्रियां ङीप्।

**सर्वत्रगामिन्** पु० सर्वत्र गच्छति गम-णिनि। १वायौ २स-

**सर्वथा** अव्य० सर्वप्रकारम् थाल्। १सर्वप्रकारे २अत्यर्थे ३प्रतिज्ञायां ४हेतौ च शब्दर०।

**सर्वदम** पु० सर्वान् दमयति दम-णिच्-अण्। सर्वदमने शाकुन्तले भरतनृपे हेमच०।

**सर्वदमन** पु० सर्वान् दमयति दम-णिच्-ल्यु। १दुष्मन्तपुत्रे भरतनृपे त्रिका०। २सर्वदमनकर्त्तरि त्रि०।

**सर्वदर्शिन्** पु० सर्वं समभावेन पश्यति दृश-णिनि। १बुद्धे २परमेश्वरे च। ३सकलद्रष्टरि त्रि० स्त्रियां ङीप्।

**सर्वदा** अव्य० सर्वस्मिन् काले दाच्। सर्वस्मिन् काले इत्यर्थे।

**सर्वदुःखक्षय** पु० सर्वेषामाध्यात्मिकाधिदैविकाधिभौतिकानां दुःखानां क्षयः। आत्यन्तिकदुःखत्रयनिवृत्तौ मोक्षे हेमच० "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" सा० सू० "स्वसमानाधिकरणदुःखासमानकालीनत्वं दुःखध्वंसरूपनिवृत्तेरात्यन्तिकत्वम्।

**सर्वदेवमुख** पु० सर्वेषां देवानां मुखं यत्र। अग्नौ रत्नमा०।

**सर्वद्र्यञ्च्** त्रि० सर्वमञ्चति पूजयति अञ्च-क्विप् अद्र्यादेशः न नलोपः। सर्वस्य पूजके। भत्वे सर्वद्रीच इत्यादि। गत्यर्थस्य नलोपे सर्वद्र्यच् इत्येव सर्वगामिनि। भत्वे सर्वद्रीच इति भेदः।

**सर्वधुरावह** त्रि० सर्वेषां धूः अच्समा० सर्वधुरा तां वहति वह-अच्। सर्वभारवाहके वृषादौ अमरः।

**सर्वधुरीण** त्रि० सर्वां धुरं वहति ख। सकलभारवाहके वृषादौ अमरः।

**सर्वनाम** पु० सर्वेषां नाम वाचकं संज्ञात्वेऽपि क्षुभ्ना० न णत्वम्। व्याकरणोक्ते कार्य्यविशेषार्थं कृतसंज्ञायुते सर्वादिशब्दभेदे "सर्वादीनि सर्वनामानि" पा० सर्वनामशब्दार्थस्तु वक्तृबुद्धिविषयतावच्छेदकधर्मोपलक्षितधर्मविशिष्टः।

**सर्वपूर्णत्व** न० सर्वैः पूर्णत्वम्। सम्भारे सामग्राम त्रिका०।

**सर्वप्रहरणायुध** पु० सर्वेषां प्रहरणानि सर्वाणि वा प्रहरणानि आयुधान्यस्य। विष्णौ "सर्वप्रहरणायुधः" विष्णु स० "व्युत्पत्तिद्वययोगात् नामद्वयम् तेन नामसहस्रपूर्त्तिः" भा०। [भक्षके त्रि० ३वह्नौ पु०।

**सर्वभक्षा** स्त्री भक्ष-अण् उप०। १छागायां हेमच० २सर्व-

**सर्वमङ्गला** स्त्री सर्वाणि मङ्गलान्यस्याः ५ब०। सर्वाणि मङ्गलानि देयत्वेनास्त्यस्याः अच् वा। दुर्गायाम् अमरः। "सर्वाणि हृदयस्थानि मङ्गलानि शुभानि च। ददाति